योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः २४

चतुर्विंशः सर्गः २४

श्रीराम उवाच ।

अस्योड्डामरलीलस्य दूरास्तसकलापदः ।

संसारे राजपुत्रस्य कालस्याकलितौजसः ।। १

अस्यैवाचरतो दीनैर्मुग्धैर्भूतमृगब्रजैः ।

आखेटकं जर्जरिते जगज्जङ्गलजालके ।। २

एकदेशोल्लसच्चारुवडवानलपङ्कजा ।

क्रीडापुष्करिणी रम्या कल्पकालमहार्णवः ।। ३

कटुतिक्ताम्लभूताद्यैः सदधिक्षीरसागरैः ।

तैरेव तैः पर्युषितैर्जगद्भिः कल्ववर्तनम् ।। ४

चण्डी चतुरसंचारा सर्वमातृगणान्विता ।

संसारवनविन्यस्ता व्याघ्री भूतौघघातिनी ।। ५

ज्ञध्वी करतले ज्ञथ्वी पानपात्री रसान्विता ।

कमलोत्पलकह्लारलोलजालकमालिता ।। ६

विरावी विकटास्फोटो नृसिंहो भुजपञ्जरे ।

सटाविकटपीनांसः कृतः क्रीडाशकुन्तकः ।। ७

अलाबुवीणामधुरः शरद्व्योमलसच्छविः ।

देवः किल महाकालो लीलाकोकिलबालकः ।। ८

अजस्रस्फूर्जिताकारो वान्तदुःखशरावलिः ।

अभावनामकोदण्डः परिस्फुरति सर्वतः ।। ९

अनुत्तमस्त्वधिकविलासपण्डितो

भ्रमच्चलन्परिविलसन्विदारयन् ।

जरज्जगज्जनितविलोलमर्कटः

परिस्फुरद्वपुरिह काल ईहते ।। १०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे कालविलासो नाम चतुर्विंशतितमः सर्गः ।।२४।